## मुख्यवार्ता :-

- केन्द्रीय-मन्त्रिमण्डलेन अद्य क्षेत्रीय-सम्पर्क-योजना उड़ान इत्यस्यै दशवर्षाणां कृते स्वीकृतिः प्रदत्ता ।
- केन्द्रसर्वकारेण 'एल.पी.जी.'-पञ्जीकरण-सीमायां सहैव पेट्रोल-डीजल-मूल्येषु किमपि परिवर्तनं नैव जातमिति स्पष्टीकृतम्।
- लोकसभया पारितं षड्विंशत्यधिक-द्विसहस्रतमस्य उभयलिङ्गि-व्यक्ति-संशोधन-विधेयकम् अद्य राज्यसभया विचारार्थं स्वीकृतम्।
- प्रथमः खेलो-इण्डिया-जनजातीय-क्रीडोत्सवः अद्य सायङ्काले रायपुर-नगरे विधिवत् प्रारप्स्यते ।

## केन्द्रीय-मन्त्रिमण्डलेन

केन्द्रीय-मन्त्रिमण्डलेन अद्य अगामि-दशवर्षाणां कृते चत्वारिंशदधिक-अष्ट शतोत्तर अष्टविंशति सहस्र कोटि-रूप्यकाणां व्ययेन 'संशोधित-उड़ान' इति क्षेत्रीय-सम्पर्क-योजनायाः विस्तारः स्वीकृतः। नवदेहल्यां मन्त्रिमण्डलस्य उपवेशनान्तरं सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत् एतस्याः योजनायाः अन्तर्गतं क्षेत्रीय-सम्पर्कं वर्धयितुं विद्यमान-अविमानपत्तनेभ्यः एकशतनूत्नानि विमानपत्तनानि विकसितानि भविष्यन्ति। एतेन दुर्गम-क्षेत्रेषु वायु-सम्पर्कः सुदृढो भविष्यति तथा च द्वितीय-तृतीय-श्रेण्याः नगरेषु आर्थिक-विकासः, व्यापारः, पर्यटनं च वृद्धिं प्राप्स्यन्ति। योजनायाः अस्याः मुख्यम् उद्देश्यं सामान्य-नागरिकेभ्यः सुलभं स्वल्पव्यययुक्तं च विमानयानस्य सौविध्यप्रदानम् अस्ति।

## सर्वदलीयोपवेशनम्

पश्चिम-एशिया-विषये सर्वकारेण आहूतं सर्व-दलीयोपवेशनं संसत्-भवन-परिसरे प्रचलति। रक्षामंत्री राजनाथसिंहः उपवेशनस्य अध्यक्षतां कुर्वन् अस्ति, यस्मिन् केन्द्रीय गृहमंत्रीः अमितशाहः, विदेशमन्त्री एस्. जयशङ्करः, पेट्रोलियममन्त्री हरदीप पुरी, संसदीयकार्यमन्त्री किरेन रिजिजू, जे. डी. यू. कार्याध्यक्षः सञ्जय् झाः, राजीव रञ्जन (ललन) सिङ्घः च उपस्थिताः सन्ति।

## मिथ्यावार्ता-खण्डनम्

सर्वकारेण सामाजिक-सञ्जालीयमाध्यमेषु प्रसारितानां सूचनानां स्पष्ट-खण्डनं विहितं यत्र प्रधानमन्त्री-उज्ज्वला-योजनायाः अन्तर्गतं एल.पी.जी.-रिफिल इति पञ्जीकरणस्य समयसीमायां परिवर्तनमिति पञ्चचत्वारिंशत्-दिनानि यावत् प्रतिपादितम्। पेट्रोलियम-प्राकृतिक-वातेन्धन-मन्त्रालयेन स्पष्टीकृतं यत् एतासु वार्तासु उज्ज्वलेतरायां एककूप्यसंयोजनाय पञ्चविंशति-दिनानि तथा च द्विकूप्यसंयोजनाय पञ्चत्रिंशत्-दिनानि इति यत् तथ्यं प्रसारितं तत् सर्वथा भ्रमात्मकम् अस्ति। मन्त्रालयेन सूचितं यत् ईदृशः कोऽपि परिवर्तननिर्णयः न स्वीकृतः। मन्त्रालयेन प्रतिपादितं यत् रिफिलपञ्जीकरणस्य वर्तमानायां समयसीमायां किमपि परिवर्तनं न जातम्। एषा व्यवस्था पूर्ववत् नगरक्षेत्रेषु पञ्चविंशति-दिनात्मिका तथा च ग्रामीणक्षेत्रेषु पञ्चचत्वारिंशत्-दिनात्मिका स्थिरा वर्तते। योजनायाः संयोजनस्य वा स्वरूपं किमपि भवेत् किन्तु पञ्जीकरणनियमः पूर्ववत् अपरिवर्तितः एव स्थास्यति।

## गुजरात-यूसीसी

गुजरातराज्यस्य विधानसभायां समान-नागरिक-संहिता (यू. सी. सी.) इति विधेयकं स्वीकृतम् इति गुजरातराज्यस्य मुख्यमन्त्री भूपेन्द्र पटेलः उक्तवान्। सामाजिकान्तर्जालीये पटले श्रीशाहः अवदत् यत् देशे प्रत्येकस्य नागरिकस्य कृते समानं विधिः भवेत् इति भाजपेति दलस्य आरम्भादेव संकल्पः अस्ति। सः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भाजपेति दलस्य राज्यसर्वकाराः अस्मिन् विषये निरन्तरं अग्रे गच्छन्ति।

## लोकसभा-वित्तविधेयकम्

लोकसभया ध्वनिमतेन षड्विंशत्यधिक-द्विसहस्रतमस्य वित्त-विधेयकः पारितः। अस्य विधेयकस्योद्देश्यं द्विसहस्रतमस्य षड्विंशतिः, सप्तविंशतिः इति वित्तीय-वर्षाय केन्द्र-सर्वकारस्य वित्तीय-प्रस्तावानां प्रभावीकरणम् इति वर्तते । सदनेन सर्वकार-पक्षतः उपस्थापित- संशोधनानां कृते स्वीकृतिः प्रदत्ता । अद्य सदने तावत् वित्त-विधेयकस्य चर्चायाः प्रत्युत्तरं प्रयच्छन्ती केन्द्रीय-वित्तमन्त्री निर्मला-सीतारमण अवदत् यत् सर्वकारः लघूद्योगानां, कृषकाणां , सहकारी-समितीनाञ्च सशक्तीकरणं कुर्वन्नस्ति यतः एते सर्वे देशस्य वृत्ति-सर्जने, उत्पादने, सर्वाङ्गीण-विकासे च केन्द्र-बिन्दवः वर्तन्ते।

**छत्तीसगढ-माओवादी**

छत्तीसगढ-राज्ये, माओवादी-सङ्घटनस्य शीर्षनेत्रा पापाराव् इत्यनेन सह आहत्य अष्टादश माओवादिनः अद्य आत्मसमर्पणं कृतवन्तः यस्मिन् सप्त महिलाः सन्ति। पापारावः माओवादी-सङ्घटनस्य राज्यक्षेत्र-समितेः सदस्यः आसीत्, तस्य उपरि पञ्चविंशति लक्षरूप्यकाणां पुरस्कारोपि आसीत्। आत्मसमर्पणावधौ ते अनेकानि शस्त्राणि अपि समर्पितवन्तः।

**प्रधानमन्त्री-नवरात्रम्**

नवरात्रोत्सवस्य सप्तमे दिवसे प्रधानमन्त्री नरेन्द्रमोदी अद्य भगवत्याः कालरात्र्याः आशीर्वादं गृहीतवान्। सामाजिक-सञ्जालीय-सन्देशे संस्कृत-सुभाषितं प्रकाशयन् श्रीमोदी प्रार्थितवान् यत् देवी कालरात्रिः सर्वेषां जीवने साहसं, सङ्कल्पं, सफलताञ्च वर्धयेत्। प्रधानमन्त्रिणा प्रतिपादितं यत् देव्याः आराधना भक्तैः सह अभिनवं आत्मविश्वासं जनयति, सर्वान् च नूतनोर्जा-भावेन पूरयति।

**उभयलिंगी-विधेयकः**

राज्यसभया अद्य षड्विंशत्यधिक-द्विसहस्रतमस्य उभयलिङ्गि-व्यक्ति- संशोधन-विधेयकम् विचारार्थं अनुमोदनार्थञ्च स्वीकृतम्। अयं विधेयकः ह्यः लोकसभया विपक्षीदलानां बहिर्गमनस्य मध्ये ध्वनिमतेन पारितम् । अयं विधेयकः उभयलिङ्गि-वर्गं पुनः परिभाषितुं प्रयतते, यस्मिन् स्व-प्रत्यक्षीकृत-लिङ्ग-परिचयस्य प्रावधानं निष्कासितं तथा च केचन सामाजिक-सांस्कृतिक-परिचयाः ट्रांस-मैस्कुलिन इति वर्गाः च अस्य परिधेः बहिः कृताः सन्ति।

उच्चसदने चर्चां प्रारभमाणा कांग्रेस-सांसदः रेणुका-चौधरी अवदत् यत् अयं विधेयकः संविधाने प्रदत्तस्य वैयक्तिक-गोपनीयतायाः अधिकारं दुर्बलीकरोति। डी.एम.के. सांसदः तिरुचि-शिवा अपि विधेयकस्य विरोधं कुर्वन् अवदत् यत् यदि एतत् संसदि बहुमतेन पारितं भवति, तदापि सर्वोच्च-न्यायालयः (Supreme Court) एतं निरस्तीकरिष्यति।

अपरत्र, विधेयकस्य समर्थनं कुर्वन्ती भाजपा-सांसदः मेधा-विश्राम-कुलकर्णी अवदत् यत् उभयलिङ्गि-व्यक्तीनां कृते न्यायस्य, गरिम्णः, अपराधिक-प्रक्रियाणां संरक्षणाय तथा च विधिक-सुरक्षा-निश्चयनाय एतत् विधेयकं महदुपयोगि वर्तते। सा प्रधानमन्त्रिणे नरेन्द्रमोदिने अपि धन्यवादं ज्ञापितवती यत् अनेन संशोधनेन सह वास्तविकाः लाभार्थिनः उचितरीत्या लाभं प्राप्तुं शक्ष्यन्ति।

**अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवः**

नवदिल्ल्याम् षड्विंशत्यधिक द्विसहस्रतम वर्षस्य अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवः, आई. एफ्. एफ्. डि., अद्य राष्ट्रिय-राजधान्यां भारतमण्डपे आरभ्यते। अद्यारभ्य अस्य मासस्य एकत्रिंशत्-दिनाङ्कपर्यन्तम् अयं महोत्सवः प्रचलिष्यति, दिल्ल्याम् आयोजिते अन्ताराष्ट्रिय-चलच्चित्रमहोत्सवे सप्तचत्वारिंशत् देशानाम् त्रिंशोत्तरैकशताधिकानि प्रदर्शनानि प्रदर्श्यन्ते। अस्मिन् कार्यक्रमे विक्की कौशल, हेमा मालिनी, भूमि पेडनेकर्, राणा दग्गुबाती, मधुर् भण्डारकर, सुभाष् घई इत्यादयः भारतीय-अन्ताराष्ट्रिय-चलच्चित्रक्षेत्रस्य च प्रसिद्धाः सदस्याः अपि उपस्थिताः भविष्यन्ति।

**भारत-ऋतु-विभागः**

भारत-ऋतु-विभागेन आई. एम्. डी. इत्यनेन श्वः पर्यन्तं आन्ध्रप्रदेशे, मध्यप्रदेशे, महाराष्ट्रे, तेलङ्गाना-प्रदेशे च वृष्ट्या सह तीव्रवायोः पूर्वानुमानं प्रकटितम्। आगामि दिनद्वयोः कर्णाटकराज्ये, उपहिमालयीये पश्चिमवङ्गप्रदेशे, विदर्भे, सिक्किम्-प्रदेशे च एतादृशेः स्थितेः अपेक्षा अस्ति। केरल-माहे-प्रदेशयोः श्वः यावत् उष्ण-आर्द्र-ऋतोः पूर्वानुमानम् अपि विभागेन प्रकटितम् अस्ति।

**खेलो-इण्डिया**

अद्य छत्तीसगढ-राज्ये प्रथमा खेलो-इण्डिया-जनजातीय-क्रीडाः आरभ्यन्ते। अप्रैल-मासस्य तृतीय दिनाङ्कपर्यन्तं प्रचलितासु क्रीडासु एथ्लेटिक्स्, हाकी, फ़ुट्बाल्, धनुर्विद्या, मल्लयुद्धं, भारोत्तोलनम्, तरणम् इत्यादीसु सप्तसु क्रीडाविभागेषु स्पर्धाः भविष्यन्ति। खेलो-इण्डिया-जनजातीय-क्रीडाः छत्तीसगढ-राज्यस्य रायपुरे, जगदलपुरे, अम्बिकापुरे च आयोज्यन्ते। अस्यां स्पर्धायां सम्पूर्णे देशे प्रायः त्रिशत् राज्याणां केन्द्रशासितप्रदेशस्य च त्रिशताधिकाः आदिवासिनः क्रीडकाः अधिकारिणः च भागं ग्रहीष्यन्ति। केन्द्रीय-युवा-प्रकरण-क्रीडामन्त्री डा. मनसुख माण्डवीयः स्पर्धायाः उद्घाटनं करिष्यति।

**॥ इति वार्ताः ॥**